## ऋदुपधाच्चाक्लृपिचृतेः। (११०/२८५९)

[1]ऋकारोपधाच्च[2] धातोः क्यप् प्रत्ययो भवति क्लृपिचृती वर्जयित्वा। [3]वृतु – वृत्यम्। वृधु – वृध्यम् [4]अक्लृपिचृतेः इति किम्? कल्प्यम्। चर्त्यम् (३.१.१२४/२८७२)। तपरकरणं किम्? 'कृत संशब्दने। (धा. पा. १६५४)। ण्यदेव भवति। कीर्त्यम्।

[२१९] पाणौ सृजेर्ण्यद् वक्तव्यः।

पाणिसर्ग्या रज्जुः।

[२२०] समवपूर्वाच्च।

[5]समवसर्ग्या॥

## ई च खनः। (१११/२८६०)

[6]खनेर्धातोः क्यप् प्रत्ययो भवति, ईकारश्चान्तादेशः। [7]खेयम्। दीर्घनिर्देशः [8]प्रश्लेषार्थः। तत्र द्वितीय इकारो 'ये विभाषा' (६.४.४३/२३१९) इति आत्त्वबाधनार्थः॥

## भृञोऽसञ्ज्ञायाम्। (११२/२८६१)

भृञो धातोः असञ्ज्ञायां विषये क्यप् प्रत्ययो भवति। भृत्याः कर्मकराः। भर्तव्याः इत्यर्थः। असञ्ज्ञायाम् इति किम्? [9]भार्यो नाम क्षत्रियः।

[२२१] सम्पूर्वाद् विभाषा। (म. भा. २.८५)

सम्भृत्याः, सम्भार्याः।

सञ्ज्ञायां पुंसि दृष्टत्वान्न ते भार्या प्रसिध्यति।
स्त्रियां भावाधिकारोऽस्ति तेन भार्या प्रसिध्यति (म. भा. २.८६)॥

## मृजेर्विभाषा। (११३/२८६२)

मृजेर्धातोः विभाषा क्यप् प्रत्ययो भवति। ऋदुपधत्वात् प्राप्तविभाषेयम्। परिमृज्यः, परिमार्ग्यः (३.१.१२४/२८७२)॥

---

1. ऋदुपधात् ग. 2. च नास्ति ग. फ. ह. 3. वृ ब. 4. अकृपि ड. 5. समवगर्या ब. 6. खनतेः फ. 7. नास्ति फ. 8. स प्रश्लेषार्थः अ. 9. भार्या नाम क्षत्रियाः अ. ड.